CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मानसी०
पूजा०

श्रीगणेशाय नमः मोहमद्यामती मुद्रामायामी नामनःपलं महेशा
नीमयोक्तं मकाराःपंचदुर्लभा १ तंब्रह्मरंध्रमध्यस्थं दिव्यकुंभमवस्थि
तम् ॥सत्यमद्याम तैः पूर्ण प्रथमः परिकीर्त्तितः २ कामक्रोधस्तथा
लो[illegible]मः पशावत्रुपमानयेत् ज्ञानखड्ग प्रहारेण द्वितीयापरि
कीर्त्तिता ३ अहमेवमहामत्स्यं वैराग्यजालततः क्षिपेत् ज्ञानक
र्त्तकं पाहन्यात् तृतीयापरिकीर्त्तिता ४ विवेकविश्वासमध्ये
रागद्वेषादिचूर्णयेत् ततपिष्ठ मुद्रिकां कृत्वा चतुर्थीपरिकी
र्त्तिता ॥५॥ कुण्डलिनी नादरूपा बिन्दुरूपः सदाशिवः तयोः संमे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वांगिरो यद्यत्कर्मकरोमिसर्वमखिलंशंभोतवाराधनम् १ रत्नैःकल्पि
तमासनंहिमजलैःस्नानंचदिव्याम्बरम् नानारत्नविभूषितंमृगम
दामोदाङ्कितंचन्दनैः जातीचंपकमालतीविरचितंपुष्पंचधूपंतथा
दीपंदेवदयानिधेतवविभोसंकल्पेतुष्यता २ सौवर्णेनवरत्न
खण्डरचितेपात्रेघृतंपायसंभक्ष्यंपंचविधंपयोदधियुतंरंभाफलं
पानकं शाकानामयुतंजलंरुचिकरंकर्पूरखण्डोज्वलंताम्बूलं
मनसामयार्पितमिदंपूजांगृहाणप्रभो ॥३॥ छत्रंचामरयुग्मकंवि
जनकंचादर्शकंनिर्मलंवीणाभेरिमृदंगकाहलकलागीतंचनृत्यंतथा॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्तनं कृत्वा पंचमं परिकीर्त्तितं ६ ज्ञानखड्गं दृढं धृत्वा वैराग्यं दृढवर्म्मिणा दुर्द्धर्मं योगसंग्रामं कोध्यास्ते कोस्ति वेश्नुवि ॥ ७ आद्यादि पंचधा मुद्रा कल्पिता हितवानवे आद्यामुद्रा विहीनाच पूजा तत्र चपा भवेत् ८ आद्यामुद्रा विना पूजा ये कुर्वन्ति द्विजातयः पतंति नरके घोरे यावत्करणोन्हः शतत्रयम् ९ इति श्रीशिवडमासंवाद मानसीक पंचमकार पूजा संपूर्ण ॥ आत्मा त्वं गिरिजा मतिः परिचराः प्राणा शरीरं गृहं पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः संचारः पदयोः प्रदक्षिणाविधिः स्तोत्राणि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मानसी° पूजा°

ते ३

साष्टांगप्रणीतं स्तुतिर्बहुविधा एतत्समस्तं मया संकल्प्येन समम
र्पितं तव विभो भक्त्या गृहाणाप्रभो ४ व्यासेन रचिता पूजा नि
त्यं पठः स्मरेन्नरः स एव मानसी पूजा सर्वभावेन भाविता प
यानि यानि च पापानि इह जन्मकृतानि च तानि तानि विन
३ श्यंति प्रदक्षिणा पदे पदे इति श्री शिवमानसी पूजा संपूर्णा ३
शुभमस्तु शुभं भूयात् ॥ संवत् १९०० शाके १७६५ ॥ ॥॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham